# shrIhanumadgItam

# શ્રીહનુમદ્ગીતમ્

## Document Information

Text title : hanumadgItam

File name : hanumadgItam.itx

Category : hanumaana

Location : doc_hanumaana

Transliterated by : Processed by Shree Devi Kumar

Proofread by : PSA Easwaran

Description/comments : From Hanumatstutimanjari, Mahaperiaval Publication

Latest update : December 8, 2016

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 17, 2023

*sanskritdocuments.org*

# શ્રીહનુમદ્ગીતમ્

વિનુતદૈવતે વિશ્વસદ્ગુરો હનુમદાખ્ય ભો હન્ત તે નમઃ ।
મનુજતાં ગતે પ્રેમતઃ સદા જનુરલઙ્કુલં જાયતાં ધ્રુવમ્ ॥ ૧॥

વિમલગૌતમીવારિમજ્જનૈઃ સુમતિભિઃ સદા સેવિતં ભજે ।
વિમલચેતસા વાયુનન્દનં કમલલોચનં કામિતાર્થદમ્ ॥ ૨॥

રઘુપતિપ્રિયં રાક્ષસાપ્રિયં ત્વઘવિદારકં સ્વાઙ્ઘ્રિસેવિનામ્ ।
જગદધીશ્વરં જાનકીહિતં નગવરાહરં નૌમિ સાદરમ્ ॥ ૩॥

વટતરોરધોઽવસ્થિતં હરિં કટકપૂર્વકાકલ્પભૂષણમ્ ।
શઠકુઠારકં શઙ્કુરં સતાં ભટતમં હરિં ભાવયામ્યહમ્ ॥ ૪॥

કવિવરેણ સત્કૃષ્ટનામિના સુતપસાઞ્જના સ્થાપિતં કિલ ।
ક્ષિતિસુધાશિનાં ક્ષેમદં સદા ગતિસુતં સ્તુવે ગેયચર્યકમ્ ॥ ૫॥

વનધિલઙ્ઘનાવાપ્તસદ્યશાઃ કનકદીધિતે કામિતે દિશામ્ ।
સુનયને સુરેશાર્ચકાદૃશે હનુમદાખ્ય મે હે મરુત્સુત ॥ ૬॥

કપિગણાધિપં કલ્પપાદપં સ્વપદસેવિનાં સન્તતં સતામ્ ।
વિપણિભૂતપૈર્વન્દિતં સુરાધિપતિભિર્ભજે ધીકૃતેઽનિલમ્ ॥ ૭॥

ભીમ મધ્વ મે ભો ત્વદાગમે રમણમઞ્જસા રામતુષ્ટિદમ્ ।
શ્રમનિવારકં શાન્તિદાયકં ત્વમનુસેવિતુસ્ત્વાં દિશેરજ ॥ ૮॥

સોન્નમિત્યભિધોપેતગ્રામસંસ્થહનૂમતઃ ।
ઇમાં સાઙ્કુર્ષિણીં ગીતાં પઠન્ કામિતમાપ્નુયાત્ ॥ ૯॥

From Hanumatstutimanjari, Mahaperiaval Publication
Proofread by PSA Easwaran psaeaswaran at gmail

*shrIhanumadgItam*

pdf was typeset on September 17, 2023

Please send corrections to *sanskrit@cheerful.com*